**CLASS : 10th (Secondary)** **Code No. 108**

**Series : Sec/Annual-2023**

रोल नं० | | | | | | | | | | |

**SET : B**

# संस्कृत

*(Academic/Open)*

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **20** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देशः –***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टलेखः लेखनीयः।*

## खण्डः 'क'

## (अपठित–अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत — $5 \times 2 = 10$

सर्वे जनाः संसारे सुखमिच्छन्ति। सुखं च धनेन एव प्राप्तुं शक्यते। अतः ज्ञानोपार्जनस्य आवश्यकता भवति। यस्य पार्श्वे धनं भवति सः सुखेन शेते। निर्धनं पुरुषं तु मित्राणि अपि त्यजन्ति। चौर्येण, कपटेन उत्कोचग्रहणेन च प्राप्तं धनं विनाशकरं भवति। कृषिकर्मणा, व्यापारेण, सेवया परिश्रमेण च प्राप्तं धनं फलति।

*प्रश्नाः —*

(क) संसारे जनाः किम् इच्छन्ति ?

(ख) सुखं केन प्राप्तुं शक्यते ?

(ग) सुखेन कः शेते ?

(घ) मित्राणि कीदृशं पुरुषं त्यजन्ति ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

## खण्डः 'ख'

## (रचनात्मक-लेखनम्)

**2.** भवती सुमित्रा। विद्यालयतः शैक्षिकभ्रमणाय दिल्लीनगरं गन्तुम् अनुमतिं धनराशिं च प्राप्तुं स्वपितरं प्रति लिखितं पत्रं मञ्जूषाप्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत — $4 \times 1 = 4$

माननीयाः पितृवर्याः, परीक्षाभवनम्

सादरं प्रणमामि। तिथिः .............

मम ......(I)........ परीक्षा समाप्ता। मम विद्यालयस्य अध्यापिकाः शैक्षिक ......(II)........... नेष्यन्ति। एतदर्थं पञ्चशतं .........(III)........ दातव्यानि। यदि भवतः ........(IV).......... स्यात् तर्हि अहम् अपि गच्छेयम्। अतः कृपया उपर्युक्तां राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्वन्तु। सर्वेभ्यः मम प्रणामाः निवेदनीयाः।

भवतां प्रिया सुता

सुमित्रा

**मञ्जूषा**

| रुप्यकाणि, प्रथमसत्रीया, अनुमतिः, भ्रमणाय। |
|---|

**3.** चित्रं दृष्ट्वा अधः प्रदत्तवाक्यानि पठित्वा रिक्तस्थानानि उचितमञ्जूषापदैः पूरयत – $4 \times 1 = 4$



(I) इदं दीपावली .............. दृश्यम् अस्ति।

(II) महिला .............. प्रज्वालयति।

(III) बालकाः बालिकाश्च ............. विस्फोटयन्ति।

(IV) सर्वे बालकाः .............. सन्ति।

**मञ्जूषा**

| स्फोटकान्, दीपान्, पर्वस्य, प्रसन्नाः। |
|---|

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'प्रातःभ्रमणम्' इति विषयम् अधिकृत्य ***चत्वारि*** वाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**4.** अधोलिखितगद्यांशस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखनीयः – 4

को न जानाति तव ध्यानावस्थाम् ? 'स्थितप्रज्ञ' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्। तव कारणात् तु सर्वं पक्षिकुलमेव अवमानितं जातम्।

**अथवा**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तममन्वधावत् अगृहणाच्च।

**5.** अधोलिखितश्लोकस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखनीयः – 4

सम्पत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये तथा।।

**अथवा**

व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा निर्दोषं परिपच्यते।।

**6.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषायां लिखत – $2 \times 2 = 4$

(क) आरोग्यं चापि परमं व्यायामादुपजायते।

(ख) पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा।

(ग) आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।

**7.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – $3 \times 1 = 3$

भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीनः इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारं उद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति।

*प्रश्नाः –*

(क) सः कथं भारम् उद्वहति ?

(ख) कस्य दैन्यं दृष्ट्वा अहं रोदिमि ?

(ग) सः किं कर्तुं न शक्नोति ?

**8.** अधोलिखितश्लोकं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत – $2 \times 1 = 2$

प्रजासुखे सुखं राज्ञः, प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः, प्रजानां तु प्रियं हितम्।।

*प्रश्नौ –*

(क) राज्ञः सुखं कस्मिन्नस्ति ?

(ख) कीदृशं हितं राज्ञः नास्ति ?

**9.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) व्याघ्रं दृष्ट्वा शृगालः अवदत्।

(ख) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

(ग) वसन्तस्य गुणं पिकः जानाति।

**10.** प्रश्नपत्रे लिखितश्लोकान् विहाय 'शेमुषी' द्वितीयो भागः' पुस्तकात् ***एकं*** शुद्धं श्लोकं संस्कृतभाषायां लिखत। 4

## खण्डः 'घ'

## (अनुप्रयुक्त–व्याकरणम्)

**11.** सम्प्रदानकारकस्य ***अथवा*** अधिकरणकारकस्य परिभाषां सोदाहरणं लिखत। 2

**12.** गुणसन्धेः *अथवा* विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**13.** द्वन्द्वसमासस्य *अथवा* कर्मधारयसमासस्य परिभाषां सोदाहरणं हिन्दीभाषयां लिखत। 2

**14.** यथानिर्देशं शब्दरूपाणि लिखत – $4 \times 1 = 4$

(क) 'राम' शब्दस्य पञ्चमी-एकवचने।

(ख) 'कवि' शब्दस्य प्रथमा-एकवचने।

(ग) 'गुरु' शब्दस्य षष्ठी-बहुवचने।

(घ) 'रमा' शब्दस्य तृतीया-एकवचने।

**15.** यथानिर्देशं धातुरूपाणि लिखत – $4 \times 1 = 4$

(क) 'भू' धातोः, – लृट्लकारः, मध्यमपुरुषस्य, बहुवचने।

(ख) 'दृश्' धातोः, – लङ्लकारः, प्रथमपुरुषस्य, एकवचने।

(ग) 'याच्' धातोः, – लोट्लकारः, उत्तमपुरुषस्य, एकवचने।

(घ) 'पठ्' धातोः, – लट्लकारः, प्रथमपुरुषस्य, बहुवचने।

**16.** प्रदत्तोपपदविभक्तिवाक्येषु रिक्तस्थानानि उचितविभक्तिपदं चित्वा पूरयत – $4 \times 1 = 4$

(क) बालः .............. बिभेति। (कुक्कुरात्, कुक्कुरस्य)

(ख) .............. विना न मुक्तिः। (ज्ञानाय, ज्ञानेन)

(ग) सः .............. खञ्जः अस्ति। (पादात्, पादेन)

(घ) .................. नमः। (शिवाय, शिवस्य)

**17.** (क) प्रदत्तवाक्येषु रिक्तस्थानपूर्तिम् अव्ययपदैः कुरुत – $2 \times 1 = 2$

(I) ग्रामं .............. वृक्षाः सन्ति। (परितः, बहिः)

(II) पिकः परभृत् .............. कथ्यते। (असि, अपि)

(ख) अधोलिखितक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत् – $2 \times 1 = 2$

(I) अनुभवति

(II) विजित्य

**18.** (क) अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत – $3 \times 1 = 3$

(I) द्वयोः + अपि

(II) ह्यनन्ताः

(III) न + अस्ति

(ख) अधोलिखितसमस्तपदानां विग्रहं कुरुत – $3 \times 1 = 3$

(I) निर्गुणम्

(II) सिंहभीतः

(III) पञ्चपात्रम्

**19.** अधोलिखितेषु पदेषु प्रकृतिप्रत्ययसंयोगं वियोगं वा कुरुत – $4 \times 1 = 4$

(I) पठनीया

(II) गम् + क्त

(III) लभ् + तव्यत्

(IV) जनता

**खण्डः 'ङ'**

**(बहुविकल्पीय-प्रश्नाः)**

**20.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्षु उत्तरेषु एकं ***शुद्धम्*** उत्तरं विचित्य लिखत – $6 \times 1 = 6$

(क) 'सलिलम्' इति पदस्य पर्यायपदं किम् ?

(I) जलम्  (II) पत्रम्

(III) विमलम्  (IV) तक्रम्

(ख) 'अस्ते' इति पदस्य विलोमपदं किम् ?

(I) दूरस्थे (II) उदये

(III) महोदये (IV) सहोदरे

(ग) 'विरुद्धमपि भोजनम्' अत्र विशेषणपदं किम् ?

(I) विरुद्धम् (II) अपि

(III) भोजनम् (IV) वि

(घ) 'विस्मितः आखण्डलः' अत्र विशेष्यपदं किम् ?

(I) आखण्डलः (II) वि

(III) स्मितः (IV) विस्मितः

(ङ) '44' इति पदस्य किं संस्कृतसंख्यावाचकपदम् ?

(I) चतुरशीतिः (II) चतुश्चत्वारिंशत्

(III) चतुस्त्रिंशत् (IV) चतुर्विंशतिः

(च) महेशः सायंकाले .............. क्रीडति। (घटिकां दृष्ट्वा रिक्तस्थानं संस्कृतपदेन पूरयत)




(I) चतुर्वादने (II) द्वादशवादने

(III) पञ्चवादने (IV) षड्वादने